

KKSF

**श्रीः**

# ब्रह्मान्ड पुराणोत्तरखन्डान्गतम्

# ललितोपाख्यानम्

## **प्रथमोऽध्यायः**

श्रीमत्त्रिपुरसुन्दर्यै ललिताम्बाये नमः।

{अकिलमही मण्डलम् पर्यटतोऽगस्तयस्य कान्चीनगरे

भगवता हयग्रीवेण समागमः ॥१॥ अगस्त्येन जगदुद्धा-

रसाधन प्रस्ने हयग्रीवेण श्री ललिताम्बापरिचर्योपदेश:} २

शुक्लाम्बरधरं विष्णुम् शशिवणम् चतुर्भुजम्

प्रसन्नवदनं ध्यायेत्सवविघ्नोपशचान्तये ॥ (१)

अस्तु वः श्रेयसे नित्यं वस्तु वामाङ्गमैश्वरम्

यतस्तृतीयो विदुषां तुरीयं तत्परं महः ॥ १॥

अगस्यो नाम देवर्षि: वेंदवेदाङ्गपारगः

सवसिद्धान्तसारज्ञो ब्रह्मनन्दोदयात्मकः ॥ २

चचराद्धुतहेतूनि तीर्थान्यायतनानि च

शैलारण्यापगामुख्याः सर्बान्जनपदानपि ॥ ३

तेपु नेप्वखिलान्जन्तूनज्ञानतिमिराव्रुतान्

KKSF Canada

KKSF Canada

शिश्नोदरपरान्द्रष्ठा चिन्तयामास तान्प्रति ॥ ४॥

चिरं चिन्तयमानस्य चरतो वसुधामिमाम्

प्राप्तमासीन्महापुण्यं कान्चीनगरमुत्तमम् ॥ ५

तत्र वारणशैलेन्द्रमेकाम्रनिलयं शिवम्

कामार्क्षीं कलिदोशघ्नीमपूजयदथात्मवान्

लोकहेतोरथद्रस्य चिन्तयानस्य धीमतः

चिरकालेन तपसा तोषितोऽभूजनार्दनः ॥ ७

हयग्रीवां तनुं कृतवा साक्षाचिन्मात्रविग्रहाम्

शन्कचक्राक्षवलय पुस्तकोज्वलबाहुकाम् ॥ ८

पूरयिच्रीं जगत्क्रुत्स्नम् प्रभया देहटजातया

प्रादुर्बभूव पुरतो मुनेरमिततेजसः ॥ ९

तं द्र्ष्वाऽनन्दभरितः प्रणम्य च मुहुर्मुहु:

विनयावनतो भूत्वा स तुष्टाव जगत्पतिम् ॥१०॥

अथोवाच जगन्नाथस्तुषटोऽस्मि तपसा तव

वरं वरय भद्रं ते भविता भूसुरोत्तम

इति प्रष्टो भगवता प्रोकच द्विजसत्तमः ॥ ११॥

यदि तुष्टोऽसि भगवन्निमे पामर जन्तवः

केनोपायेन मुक्ताः स्युरेतन्मे वक्तुमर्हसि

इति प्रो द्विजेनाह देवदेवो जनार्दनः ॥ १२॥

एप एव पुरा प्रश्र: शिवेन कथितो मम

अयमेव कृतः प्रश्नो ब्रह्मणा च ततः परम् ॥१३॥

कृतो दुर्वाससा पश्चाद्भवता तु ततः परम्

भवद्भिः सर्वलोकानां गुरुभूतैमेहात्मभिः ॥ १४॥

ममोपदेशो लोकेषु प्रथितोऽस्तु वरान्मम ॥ १५॥

अहमादिर्हि मूतानामादिकर्ता स्वयं प्रभुः

श्रुष्टिस्थितिलयानां तु सर्वेषामपि कारकः ॥१६॥

त्रिमूर्तित्रिगुणातीतो गुणहीनो गुणाश्रयः

इच्छाविहारी भूतात्मा प्रधानपुरषात्मकः (१५

एवंभूतस्य मे ब्रह्मन्त्रिजगद्रूपधारिणः

द्विधा कृतमभूद्रूपं प्रधानपुरुषात्मकम्

मम प्रधानं यद्रूपम् सवभूतगुणात्मकम् ॥ १८

अपरं यद्गुणातीतं परात्परतरं महत्

एकमेवैतयोर्ज्ञात्वा मुच्यते ते उमे किमु ॥ १९॥

तपोभिश्चिरकालोत्थैर्यमैश्च' नियमैरपि

त्यागैर्दुषकर्मनाशान्ते मुक्तिराध्येन लभ्यते। २०॥

यद्रूपं यद्गुणयुतं तत्गुणैक्येन भ्यते

अन्यत्सव्रम् जगद्रूपं कर्ममोगपरात्मकम् ॥ २१॥

कर्मभिर्लभ्यते तच्च  तत्यागेनापि लभ्यते

दुष्करस्तु तयोत्स्यागः सकलैरपि तापस ॥ २२॥

अनपायम् च सुगमं सदसत्कर्मगोचरम्

आत्मस्थेन गुणेनैव सता वाप्यसतापि वा

आत्मैक्येनैव यज्ज्ञानं सर्वसिद्धिप्रदायकम् ॥२३॥

वर्णाश्रमविहीनानां पापिष्ठानां नृणामपि

यद्रूपध्यानमात्रेण दुष्कृतं सुक्रुतायते ॥ २४

येऽर्चयन्ति परां शक्तिं विधिनाऽविधिनापि वा।

नते संसारिणो नूनं मुक्ता एव न संशयः ॥२५॥

शिवोऽपि यां समाराध्य ध्यानयोगबलेन च

ईश्वर: सर्वसिद्धीनामर्धनारीश्वरोऽभवत्

अन्येऽव्जजमुखा देवाः सिद्धासद्धयानवैभवात्

तस्मादशेषलोकानां त्रिपुराराधनं विना

न स्तो भोगापवर्गौ तु य़ोगपद्येन कुत्रचित् ॥२७

तस्मान्मन्त्रास्त्रसंयुक्तन्यासपूर्वक्रमेण च

तन्मनास्तद्गतप्राणस्तद्याजी तद्गतेहकः

तादात्मैक्येन कमाणि कुर्वन्मुक्तिमवाप्यति २८

एतद्रहस्यमाख्यातं सर्वेषां हितकाम्यया

संतुष्टेनैव भवतस्तपसा मुनिसत्तम ॥ २९

देवाश्च ऋषयः सिद्धा मनुष्याश्च तथेत्परे

KKSF Canada

त्वन्मुखाम्भोजतो लब्ध्वा सिद्धिम् यान्तु परात्पराम्

इति तद्वचनं श्रुत्वा हयग्रीवस्य शार्गिण:

प्रणिपदय पुनर्वाक्ययुवाच मधुसूदनम् ॥ ३१॥

भगवन्कीङ्कशम्  रूपं भवता यत्पुरोदितम्

किंविहारं किप्रभावमेतन्मे वक्तुमर्हसि ॥ ३२

श्री हयग्रीव उवाच:

एषोंऽशभूतो देवर्षिर्हयग्रीवो ममापरः

श्रोतुमिच्छसि यद्यच्वं तत्तत्तव वदत्ययम् ॥ ३३॥

इन्द्रादित्य जगन्नाथो हयग्रीवं तपोनिधिम्

पुरतः कुम्भजातस्य मुनेरन्तरधीयत ॥ ३४

ततस्तु विस्मयाविष्टो दृष्टरोमा तपोधनः

हयग्रीवेण मुनिना स्वाश्रमं प्रत्यपद्यत ॥ ३५

**इति श्रीव्रह्माण्डपुराणे उत्तरखण्डे ह्मयग्रीवागस्त्यसम्वादे प्रथमोध्याय: ॥ १॥**

KKSF Canada